
# चतुर्दशः पाठः । काव्यशास्त्रविनोदः । (कण्ठस्थीकरणार्थम्)

संस्कृतभाषायां सुभाषितानां महाभाण्डारं विद्यते। कानिचन सुभाषितानि चमत्कृतिपूर्णानि। तेषाम् अर्थावबोधः न सरलः। प्रहेलिकाः, कूटप्रश्नाः समस्यापूर्तिः च एते प्रकाराः अस्माकं कृते मस्तिष्कखाद्यम् एव। सुभाषितानां रचना हास्यरसपूर्णा हृद्या च। अतः एव एते काव्यप्रकाराः वाचकानां मनः विनोदयन्ति।




**साक्षरा विपरीताश्चेद् राक्षसा एव केवलम्।**
**सरसो विपरीतोऽपि सरसत्वं न मुञ्चति ।।१।।**

**वृक्षाग्रवासी न च पक्षिराजः**
**त्रिनेत्रधारी न च शूलपाणिः।**
**त्वग्वस्त्रधारी न च सिद्धयोगी**
**जलं च बिभ्रन्न घटो न मेघः ।।२।।**

**तातेन कथितं पुत्र पत्रं लिख ममाज्ञया।**
**न तेन लिखितं पत्रं पितुराज्ञा न लङ्घिता ।।३।।**

**न तस्यादिर्न तस्यान्तः यो मध्ये तस्य तिष्ठति।**
**तवाप्यस्ति ममाप्यस्ति यो जानाति स पण्डितः ।।४।।**

**मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम्।**
**लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ।।५।।**

**गङ्गायाश्चञ्चलतरे वारिणि प्रतिबिम्बितम्।**
**शोभते तारकायुक्तं शतचन्द्रं नभस्तलम् ।।६।।**

**यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून् मृषा**
**नैषां गर्ववचः शृणोषि न च तान् प्रत्याशया धावसि।**
**काले बालतृणानि खादसि परं निद्रासि निद्रागमे**
**तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः ।।७।।**



## स्पष्टीकरणम्

**श्लोकः १** – साक्षराः इति पदं विपरीतक्रमेण पठितं चेत् 'राक्षसाः' इति भवति। परं 'सरसः' इति पदम् यथानुक्रमं वा विपरीतक्रमेण पठितं चेत् 'सरसः' इत्येव भवति। अत्र कविकल्पना एवं कविकौशलं विभाति।

**श्लोकः २** – सः वृक्षस्य अग्रे वसति किन्तु पक्षिराजः गरुडः न। तस्य त्रीणि नेत्राणि सन्ति किन्तु सः शूलपाणिः शङ्करः न। सः वल्कलसदृशं वस्त्रं धारयति किन्तु सः सिद्धयोगी न। सः जलं धारयति किन्तु सः न घटः न च मेघः। अस्य उत्तरं वर्तते नारिकेलफलम्।

**श्लोकः ३** – तातेन कथितम्, "हे पुत्र, मम आज्ञया पत्रं लिख।" तेन पुत्रेण पत्रं न लिखितम्। तथापि पितुः आज्ञा न लङ्घिता। अर्थसङ्गतिः न दृश्यते। यदि 'न तेन' इति एकपदं क्रियते चेत् ' नतेन' इति पदेन अर्थबोधः भवति। नतेन नाम नम्रस्वभावेन पुत्रेण पत्रं लिखितम्। अपि च पितुः आज्ञा न लङ्घिता।

**श्लोकः ४** – कूटप्रश्नः अयम्। अस्य उत्तरम् – तस्य आदिः न, तस्य अन्तः न, तस्य मध्ये यः तिष्ठति ( तत् ) तव अपि अस्ति, मम अपि अस्ति।

**श्लोकः ५** – मृगाः तृणानि खादन्ति। मत्स्याः जले विहरन्ति। साधवः सन्तोषं यच्छन्ति। परम् अस्मिन् जगति लुब्धकाः मृगान्, धीवराः मत्स्यान् तथा दुष्टाः साधून् निष्कारणमेव पीडयन्ति। अत्र यथासङ्ख्य-अलङ्कारः विद्यते।

**श्लोकः ६** – शतचन्द्रं नभस्तलम्। इति काचन समस्या वर्तते। आकाशे चन्द्राणां शतं कथं शक्यते? इत्येषा समस्या। समस्यापूर्तिः – गङ्गानद्याः जलं कल्लोलयुक्तं विद्यते। यदा गगने तारकाः चन्द्रमाः च विलसन्ति तदा चन्द्रमसः शतं प्रतिबिम्बानि गङ्गानद्याः जले दृश्यन्ते। तदा कविः कल्पनां करोति, 'नभः शतचन्द्रम्' इव दृश्यते।

**श्लोकः ७** – हे कुरङ्ग, यत् त्वं धनिकानां वक्त्रं मुहुः न ईक्षसे, मृषा चाटून् न ब्रूषे, एषां गर्ववचः न शृणोषि, प्रत्याशया च तान् प्रति न धावसि। काले बालतृणानि खादसि परं निद्रागमे निद्रासि। तत् मे ब्रूहि, भवता किं नाम तपः तप्तम्? एषा कुरङ्गान्योक्तिः वर्तते। सज्जनान् उद्दिश्य एषा अन्योक्तिः।

## भाषाभ्यासः



### श्लोकः १

**१. एकवाक्येन उत्तरत।**

अ) विपर्ययः कस्मिन् शब्दे दृश्यते ?
आ) विपर्ययः कस्मिन् शब्दे न दृश्यते ?
इ) मानवाः कीदृशाः भवेयुः ?
ई) मानवाः कीदृशाः न भवेयुः ?

**२. कोष्टकं पूरयत।**

| साक्षरः मनुजः | सरसः मनुजः |
|---|---|
| --- | --- |

(सरसत्वम्, राक्षसत्वम्, विपरीतत्वम्)

**३. समानार्थकशब्दं लिखत।** राक्षसः, सरसः

**४. सन्धिविग्रहं कुरुत।**

अ) विपरीतोऽपि =     आ) विपरीताश्चेत् =

### श्लोकः २.

**१. एकवाक्येन उत्तरत।**

अ) वृक्षाग्रवासी कः ?   आ) कः पक्षिराजः ?
इ) कः त्रिनेत्रधारी ?   ई) कः शूलपाणिः ?
उ) कः जलं बिभर्ति ?   ऊ) कः त्वग्वस्त्रं धारयति ?

**२. शब्दसमूहस्य कृते एकं संक्षेपशब्दं लिखत।**

अ) यः वृक्षस्य अग्रभागे निवसति –
आ) पक्षिणां राजा –
इ) यस्य त्रीणि नेत्राणि –
ई) शूलं पाणौ यस्य सः –
उ) यः त्वग्वस्त्रं धारयति –

**३. योग्यं पर्यायं चिनुत –**

अ) पक्षिराजः वृक्षाग्रे (वसति/न वसति)।
आ) घटः त्रीणि नेत्राणि (धारयति/न धारयति)।
इ) शूलपाणिः जलं (बिभर्ति / न बिभर्ति)।
ई) नारिकेलं त्वग्वस्त्रं (धारयति/न धारयति)।

**४. समानार्थकशब्दयुग्मं चिनुत लिखत च।**

पक्षिराजः, शूलपाणिः, जलम्, मेघः, शङ्करः, वृक्षः, सिद्धयोगी, गरुडः, तरुः, तोयम्, जलदः, तपस्वी।

### श्लोकः ३.

**१. कः कं वदति?**   'पत्रं लिख।'

**२. एकवाक्येन उत्तरत।**

अ) केन आज्ञा दत्ता?   आ) केन आज्ञा न लङ्घिता।
इ) पत्रं केन लिखितम् ?

**३. विशेषण-विशेष्य-अन्विर्तिं पूरयत।**

| विशेषणम् | विशेष्यम् |
|---|---|
| ______ | पुत्रः |
| लिखितम् | ______ |

**४. सन्धिविग्रहं कुरुत।** ममाज्ञया, पितुराज्ञा

**५. श्लोकात् 'क्त' प्रत्ययान्तरूपाणि (क.भू.धा.वि.) चिनुत लिखत च।**

### श्लोकः ४.

**१. क्रमानुसारं रचयत।**

अ) त्रि-अक्षरयुक्ते शब्दे 'य' मध्ये तिष्ठति।

आ) शब्दस्य आरम्भे 'न' विद्यते।
इ) शब्दस्य अन्ते अपि 'न' विद्यते।

२. प्राप्तम् उत्तरम् – ☐ ☐ ☐

३. सन्धिं कुरुत।
अ) तस्य + आदि: (अ + आ) ________
आ) तस्य + अन्त: (अ + अ) ________
इ) तव + अपि (अ + अ) ________
ई) अपि + अस्ति (इ + अ) ________

४. श्लोकात् षष्ठ्यन्तपदानि चिनुत लिखत च।

**श्लोक: ५.**

१. तालिकापूर्तिं कुरुत।

| | | | | |
|---|---|---|---|---|
| | तृणवृत्ते: | | वैरी | भवति |
| | जलवृत्ते: | | वैरी | भवति |
| | सन्तोषवृत्ते: | | वैरी | भवति |


मञ्जूषा–(सज्जनस्य,धीवर:,लुब्धक:,मृगस्य,मीनस्य, पिशुन:)

२. अधोदत्तवाक्यानि श्लोकस्थ–समानार्थक–शब्दै: पुन: लिखत।
अ) हरिण: शष्पाणि भक्षयति तथापि व्याध: तस्य शत्रु: भवति।
आ) मत्स्य: जलं पिबति तथापि धीवर: तस्य रिपु: भवति।
इ) सत्पुरुष: नि:स्पृह: वर्तते तथापि दुर्जन: तस्य अरि: भवति।

**श्लोक: ६.**

१. एकवाक्येन उत्तरत।
अ) कस्या: नद्या: वर्णनं सुभाषिते वर्तते?
आ) शतचन्द्रं नभस्तलं कुत्र शोभते ?

२. विशेषणै: जालरेखाचित्रं पूरयत।




३. विशेषणं लिखत।
१) ________ वारिणि।
२) ________ नभस्तलम्।

४. गङ्गा इति शब्दस्य अमरपङ्क्तिं लिखत।

**श्लोक: ७.**

१. रिक्तस्थानं पूरयत।
अ) त्वं धनिनां ________ मुहु: न ईक्षसे।
आ) त्वं मृषा चाटून् न ________।
इ) त्वं एषां ________ न शृणोषि।
ई) त्वं तान् प्रति ________ न धावसि।
उ) त्वं काले बालतृणानि ________।
ऊ) त्वं ________ निद्रासि।
ऋ) हे कुरङ्ग, तद् ________ ब्रूहि।
ॠ) भवता किं नाम तप: ________।

२. प्रश्ननिर्माणं कुरुत।
अ) त्वं धनिनां वक्त्रं मुहु: न ईक्षसे।
आ) त्वं निद्रागमे निद्रासि।

३. समानार्थकशब्दं चिनुत लिखत च।
वदनम्, असत्यम्, शष्पम्, स्वाप:, मृग:, पश्यसि

४. श्लोकात् षष्ठ्यन्तपदे चिनुत लिखत च।

**यदि –– तर्हि क्रीडा** – (गणकार्यं करणीयम्।)
एकेन गणेन 'यदि' उपयुज्य एकैकं वाक्यं लेखनीयम्। अन्येन गणेन 'तर्हि' इति पदं योजयित्वा एकैकं वाक्यं लेखनीयम्। 'यदि' चिटिका: पृथक् स्थापयितव्या:। 'तर्हि' चिटिका: पृथक् स्थापयितव्या:। शिक्षकेण काऽपि एका 'यदि' चिटिका पठितव्या। अनन्तरं 'तर्हि' चिटिका पठितव्या। यद् वाक्यं तस्मात् प्राप्यते तद् अर्थपूर्णं भवेत् वा न इति न द्रष्टव्यं केवलं हसितव्यम्।
यथा – यदि अहं भिषग्वरा भविष्यामि तर्हि पशव: नर्तिष्यन्ति। ☺ ☺ ☺